प्रारम्भाब्दः १९६४

ISSN 2348-9847

वर्षम् - ५३

वार्षिकी शोधपत्रिका

अङ्कः ५३

२०१६ - २०१७

# सुरभारती



THE MAHARAJA SAYAJIRAO UNIVERSITY OF BARODA

सत्यं शिवं सुन्दरम्

Estd. 1949

पारम्परिकसंस्कृताध्ययनविभागः

बरोडासंस्कृतमहाविद्यालयः

महाराजासयाजिरावविश्वविद्यालयः, वटोदरम्

Scanned by CamScanner

ISSN-2348 9847



# जीवब्रह्मणोरभिन्नता

–डॉ. शत्रुघ्नपाणिग्राही*

भारतीयदर्शनशास्त्रं वेदमूलकं वर्तते। वेदेष्वेव भारतीयदार्शनिकता परिपूर्णतया प्रसृता। वेदस्यान्तिमभागः उपनिषद्भागः वेदान्तनाम्ना ख्यातः। 'ब्रह्म' प्रतिपादनमेव वेदान्तशास्त्रस्य मुख्यप्रतिपाद्यविषयः वर्तते। परम् अपरञ्चेति भेदेन ब्रह्मणः भागद्वयं वर्तते। अपरं ब्रह्म शाब्दब्रह्म, परब्रह्म परमात्मा। परब्रह्म नित्यम्, अजं, शाश्वतम्, अनन्तं, निराकारं, शुक्रं अव्रणम्, अस्त्रावीरं, शुद्धम्, अपापविद्धं, कविः, मनीषी, परिभूः, स्वयम्भूः, सर्वविद्यश्च।[१]

परब्रह्मणः प्रकाशः जीवो भवति। आत्मनः प्रतिबिम्बञ्च देही जीवः। यथा अग्नेः क्षुद्राः विस्फुलिङ्गाः प्रादुर्भवन्ति तथैव परमात्मनः सकाशात् जीवस्य प्रादुर्भाव इति कथनेन जीवसत्ता सर्वदैवास्तीति ज्ञायते। प्रलयकाले सर्वलोकान् संहृत्य यः परमेश्वरःस्वयमेक एवासीत्। स तादृशः परमेश्वरः आशिषाभिलाषेण **'बहुस्यां प्रजायेय'** इत्येवं रूपेण पुनः सिसृक्षारूपेण द्रविणमिच्छमानः जगद्रूपं धनमपेक्षमाणः अवरानभिव्यक्तोपाधीनाविवेश जीवरूपेण प्रविष्टः। श्रूयते ऋग्वेदे यथा–

**य इमा विश्वा भुवनानि जुह्वदृषिर्होता न्यसीदत् पिता नः।**

**स आशिषा द्रविणमिच्छमानः प्रथमच्छदवराँ आ विवेश ।।[२]**

जीवानामनेकत्वं स्फुटिकुर्वद्भिः स्मृतिकारैः उपदिश्यते। तद्यथा उक्तं भगवता मनुना–

**असङ्ख्या मूर्त्तयस्तस्य निष्पतन्ति शरीरतः।**

**उच्चावचानि भूतानि सततं चेष्टयन्ति याः।।[३]**

सुखदुःखेच्छाद्वेषप्रयत्ना जीवलिङ्गानि भवन्ति। एतानि एकस्मिन् एव समये सर्वेषु शरीरधारिषु न तावत्समानानि परिलक्ष्यन्ते। स्वभाववशात् एतेषु वैभिन्न्यं समुपद्यते। अतः जीवात्मनः प्रतिदेहं भिन्नता भवति। वेदान्तशास्त्रे विशेषतः द्वैताद्वैतवेदान्ते भगवता

* असि.प्रोफेसर, वेदवेदाङ्गसङ्कायाध्यक्षः, श्रीसोमनाथसंस्कृतयुनिवर्सिटी–वेरावलम् (गुज.)

१. शुक्लयजुर्वेद-४०-८   २. ऋग्.-१०/८१/१, शु.यजु.-१७/१७, तै.सं.-४.६.२.१   ३. मनुस्मृति-१२/१५

श्रीनिम्बार्काचार्येण जीवानामनेकत्वमुपदिष्टम्। तत् तत्त्वं तदीय-वेदान्तकामधेनुदशश्लोकिग्रन्थे सन्निवेषितं वर्तते। "व्यवस्थातो नाना"[४] इति न्यायवैशेषिकसूत्रप्रमाणत्वात् पुरुषबहुत्वं सिध्यति। तथा चोपदिष्टं भगवता कपिलेन सांख्यदर्शने(५/६१) यथा–

जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ।।[५]

जीवानां कार्यशैल्या विभेदकारणात् अनेकत्वं सिद्धमिति आचार्येण डॉ. विश्वनाथ-स्वाई-महोदयेन वेदान्तकामधेनुदशश्लोकी ग्रन्थे विस्तरशः प्रतिपादितम्। श्रीमद्भागवते एतस्मिन् प्रसङ्गे वर्तते यथा–

रजोभिः समसंख्याताः पार्थिवैरिह जन्तवः।
तेषां ये केचनेहन्ते श्रेयो वै मनुजादयः ।।[६]

अपरिमिता ध्रुवास्तनुभृतो यदि सर्वगतास्तर्हि न शास्यतेति नियमो ध्रुव नेतरथा।
अजनि च यन्मयं तदविमुच्य नियन्तृ भवेत् सममनुजानतां यदमतं मतदुष्टतया।।[७]

अनेनैव जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरोत् ।

जीवः परमपुरुषस्याख्यस्य ब्रह्मणः अंशविशेषः। अतः सर्वे जीवात्मनो यथाकालमुपाधिरहिते परमात्मनि परब्रह्मण्येव निमीलन्ति। श्वेताश्वेतरोपनिषद्यपि श्रूयते यथा–

'नित्यो नित्यानां चेतश्चेतनानामेको बहूनां यो विदधाति कामान्।
तत् कारणं साङ्ख्ययोगाधिगम्यं ज्ञात्वा देवं मुच्यते सर्वपाशैः'।।[८] इति

पुनश्च कठोपनिषदि श्रूयते यथा–

'नित्योऽनत्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्।
तमात्मस्थं येऽनुपश्यन्ति धीराः तेषां शान्तिः शाश्वती नेतरेषाम्।।'[९]

जीवः नित्यः इति कथनेन सत्व-रजस्-तमोगुणाश्रितः स अवश्यमेव भवतीति ज्ञायते। अन्यथा उपरोक्तकृष्णयजुर्वेदीयं श्रुतिवाक्यं निरर्थकं भविष्यति। ब्रह्मणः अंशविशेषः जीवः एव इति पुरुषसूक्तेऽपि श्रूयते–

'पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतन्दिवि'[१०] ।

४. न्या.वै.सू.-३/२/२० ५. सां.का.-१८ ६. भागवत-६/१४/३
७. भागवत-१०/८७/३० ८. श्वेताश्वतर.उप.-६/१३ ९. कठोप.-२/२/१३ १०. पुरुषसू.-३१/३

श्रीमद्भगवद्गीतायां श्रीकृष्णेनापि उक्तम्– **'ममैवांशो जीवलोके जीवभूतः सनातनः'**[११] इति। जीवो नित्यचेतनः शरीरसंयोगवियोगयोग्यः, अणुपरिमाणः प्रतिदेहं भिन्नो ज्ञाता अनन्तश्चेत्याद्युपदिश्यते महर्षिणा वेदव्यासेन ब्रह्मसूत्रे यथा–

**'चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात्'**[१२] ।

जीवः स्वरूपतः अणुपरिमाणविशिष्टं वर्तते न तु सर्वव्यापकः। अपि च कर्म-कर्मफलविषयेऽपि स्वतन्त्रभोक्ता वर्तते न तु एकस्य जीवस्य कर्मफलम् अपरमाश्रयति। यदि जीवः सर्वव्यापकः भवेत् चेत् प्रत्येकं जीवस्य कर्मफलेन सह अन्येषां जीवानां सम्बन्धः अपि भवेत्। परन्तु तादृशः न भवति। अतः जीवः विभुः न अणुमात्रं वर्तते। **'अंशो ह्येष परस्यम्'**[१३] इति ब्रह्मसूत्रवचनानुसारं जीवस्तु परब्रह्मणः अंश-विशेषः वर्तते तत्तु निश्चितमेव। अतः मुण्डकश्रुतिरपि समर्थयति यथा– **'एषोऽणुरात्मा चेतसा वेदिव्यो यस्मिन् प्राणः पञ्चधा संविवेश'**[१४]।

वेदान्तशास्त्रे जीवस्य अनेकत्वार्थं केचन आचार्याः अवच्छेदकवादं प्रतिपादयन्ति। एतद् वादानुसारं एकमेवाकाशं भिन्ने घटे प्रकोष्ठे वा दृश्यमानं घटाकाशं– मठाकाशमिति संज्ञां लभते, तथैव एक एव परमात्मा भिन्नः भिन्नो जीवरूपेण दृश्यते। वस्तुतस्तु तद् ब्रह्म शुद्धचैतन्यमेवास्ति। घटरूपे मठरूपे वा उपाधौ विनष्टे तद्गतमाकाशं मूलाकाशरूपतां प्रतिपद्यते, तथा अन्तःकरणरूपोपाधौ नष्टे सति स जीवः शुद्धचैतन्यब्रह्मरूपतां प्राप्नोति। जीवात्मनः अनेकत्वविषये श्रूयते ब्रह्मबिन्दूपनिषदि–

**एक एव हि भूतात्मा भूते भूते व्यवस्थितः।**
**एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ।**[१५]

एकोऽपि सन् परमात्मा प्रतिरूपो जायतेति कठोपनिषदि श्रूयते–

**अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।**
**एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ।।**
**वायुर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।**
**एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ।।**[१६]

ब्रह्म सर्वत्र विराजमानं प्रकाशमानं सत् नित्यं भवति। अतः शाङ्करवेदान्तस्य

---

११. श्रीम.गीता-१५/७ १२. ब्रह्मसूत्रम्-२/३/१६-४१ १३. ब्रह्मसूत्रम्-२/३/४२
१४. मुण्डकोप.-३/१/९ १५. ब्रह्मबिन्दूपनिषदि- १६. कठोप.-२/२/९-१०



Scanned by CamScanner

एष उद्घोषः दार्शनिके जगति सुप्रसिद्धः यत् **'ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः'** इति। अस्य कथनस्य अयमेवाभिप्रायः यत् संसारस्य कोऽपि पदार्थः तदैव सुखदो भवति यदा स आत्मनः संस्पर्शं लभते। यतो हि आलीनत्वेन अनुभूयमानस्य परकीयस्य सुन्दरस्यापि वस्तुनः सुखजनकत्वं न भवति। अतः स्पष्टमिदं मन्तव्यं यत् लोकस्य कश्चन विषयः स्वयं सुखं न प्रसूते किन्तु आत्मसम्पर्कादेव। 'आत्मा सच्चिदानन्दरूपः'। तस्य सत्तायाः चेतनायाः, आनन्दस्य च आभासमात्रमेव जगतः विषयाः सत्तां प्रकाशमानाम् आसादयन्ति। शङ्करदृष्ट्या 'जीव' तत्त्वविषये आचार्यशङ्करः अपरोक्षानुभूतौ प्रतिपादयति यथा—

**'यद्वन्मृदि घटभ्रान्तिं शुक्तौ वा रजतस्थितिम्।**

**तद्वद् ब्रह्मणि जीवत्वं भ्रान्त्या पश्यति न स्वतः।'**

अर्थात् यथा मृतिकायां घटस्य भ्रान्तिर्जायते, यथा शुक्तौ रजतभ्रान्तिर्जायते तथैव ब्रह्मणि भ्रान्त्या जीवत्वं प्रतिभासते। वस्तुतस्तु जीवतत्त्वं ब्रह्मणः अंशत्वं वर्तते। यथा एकस्य एव सूर्यस्य प्रकाशः सर्वत्र निपतति तथैव एकस्यैव ब्रह्मणः प्रकाशो भिन्नभिन्नान्तः जीवेषु निपतति। एतस्मिन् प्रसङ्गे कठोपनिषदि श्रूयते यथा—

**अग्निर्यथैको भुवनं प्रविष्टो रूपं रूपं प्रतिरूपो बभूव।**

**एकस्तथा सर्वभूतान्तरात्मा रूपं रूपं प्रतिरूपो बहिश्च ।।**[१७]

आत्मैव जीवात्मा। नाऽयं ब्रह्मणोभिन्नः, ब्रह्मैव अविद्यया आवृत्तम्। अविद्यया अन्तःकरणेन अविच्छिन्नं सद् अल्पसत्ताम् अनीश्वरतां सुखःदुखादिकं च समाश्रयद् जीवशब्देन व्यपदिश्यते। आत्मशब्दो हि चैतन्यगुणयोगेन जीवो ब्रह्म च उभयमेव भवति। जीवब्रह्मणी समानेन नाम्ना, समानया गत्या, समानेन पक्षेण मिथः सख्यभावेन च समानं वृक्षमाश्रित्य तिष्ठतः। तयोः एकः आश्रयभूतस्य वृक्षस्य स्वादूनि फलानि भुङ्क्ते। अन्यश्च अभुञ्जानः केवलं प्रेक्षमाणस्तिष्ठतीति ऋग्वेदश्रुतिः[१८] प्रतिपादयति। अत्र अंशभूतो जीवः अणुः, अनिरक्तः, अल्पानन्दः, स्वल्पभाग्यः, अल्पकालिकश्च भवति। परन्तु अंशीभूतो परमात्मा महान्, सर्वज्ञः, ईश्वरः, महाभाग्यः, असीमानन्दः, नित्यः, शाश्वतः, चिरन्तनसत्यमिति आचार्यशङ्करेण ब्रह्मसूत्रभाष्ये उल्लिखितम्। जीवः जानाति यत् तस्य हृदि ईश्वरः विराजते। तस्य ईश्वरस्य विराट्रूपेण प्रकाशः मूलमेवासीत्। एतस्मिन्

१७ कठोप.-२/१०

१८. द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परि षस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभि चाकशीति।। ऋग्.-१/१६४/२०, अथर्व.-९/९/१३, निरुक्त-१४/३०

Scanned by CamScanner

प्रसङ्गे शुक्लयजुर्वेदीय-काण्वसंहितायां यत् सर्ववेदान्तवेद्यः परमात्मा स्वमायया विराट्देहं ब्रह्माण्डरूपं सृष्ट्वा तत्र जीवरूपेण प्रविश्य ब्रह्माण्डाभिमानी देवात्मा जीवोऽभवत्[१९]। अपि च एतद् श्रूयते अथर्वणोत्तरतापनीये यथा–**'स वा एष भूतानीन्द्रियाणि विराजं देवताः केशांश्च सृष्ट्वात्र प्रविष्टो विहरति'**[२०] अर्थात् भूमिसृष्टेरनन्तरं तेषां जीवानां शरीराणि ससर्ज। जीवो यद्यपि स्वेच्छाबलेन कर्माणि कुरुते तथापि तेन अवश्यं ज्ञातव्यं यत् तस्य नियन्तुः इच्छानुसारेण तेन सर्वं साध्यते। नियन्तुः परब्रह्मणः अधीनतां स्वीकुर्वन् जीवः परब्रह्ममयो भवति। आवरणशक्तेः स्थितिहेतोः जीवपरब्रह्मणोः भेदो न ज्ञायते, तस्यां नष्टायां सत्यां भेदः कथं ज्ञायते उक्तं सरस्वतीरहस्योपनिषदि यथा–

**अस्य जीवात्मारोपात् साक्षिण्यप्यवभासते।**

**आवृत्तौ तु विनष्टायां भेदे भातेऽपयाति तत्।।**

**तथा सर्गब्रह्मणोश्च भेदमावृत्य तिष्ठति।**

**या शक्तिस्तद्वशाद् ब्रह्म विकृतत्वेन भासते ।।**

**अत्राप्यावृत्तिनाशेन विभाति ब्रह्मसर्गयोः ।**

**भेदस्तयोर्विकारः स्यात् सर्गे न ब्रह्मणि क्वचित्।।**[२१]

जीवः यदा अन्येषां स्थितिं ज्ञातुं प्रभवति स्वयमपि किं तावत् कर्तव्यं किं वा न कर्तव्यं इति विषये सचेतनः भवेत्। जीवकृते निमित्तोपादानकारणरूपेण परब्रह्म विराजते। तेनैव अभिप्रेरितः सन् जीवः पुनः तस्मिन् निमीलति। जीवपुरुषः सत्तापरिकल्पनां विना केवलं ईश्वरार्पणबुद्ध्या सर्वं कर्तुं प्रवृत्तो भवेत् चेत् तत्रैव सहावस्थानं संघटितं भवति। जीवस्य ब्रह्मव्यतिरेकेण वास्तविकी स्थितिर्नास्ति। ब्रह्मैव अविद्योपाधिवशात् जीवभावं प्रपद्यते। एकस्यैव तत्त्वस्य समष्टिव्यष्टिरूपेण नामान्तरं ब्रह्मजीवात्मानौ इति। अंशभूतो जीवो हि अंशीभूतस्य भगवता सान्निध्यलाभाय सततं चेष्टते, ब्रह्मविद्यया अविद्यानिवृत्तौ जीवभावो निवर्तते। इति शम्।।

✦✦✦✦✦✦✦✦✦✦✦✦✦

१९. पुरुषसूक्तम्-३५/५ २०. अथर्वणोत्तरतापनीये-२/९ २१. सरस्वतीरहस्योपनिषद्



Scanned by CamScanner